श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

सर्वज्ञभट्टर् कृतिषु

# ॥ श्री कूरेश विंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कूरेश विंशतिः ॥

श्रीरङ्गोज्ज्वलमध्यवीथिनिलयं श्रीराममिश्रात्मजं
श्रीभट्टार्यपदाश्रयं शुभगुणं वाचाञ्जयिभ्रातरम्।
लोकार्यप्रवणं तदुक्तिरसिकं सर्वज्ञभट्टारकं
वन्दे तं भुवि विंशति व्यतनुत श्रीवत्सचिह्नस्य यः॥

श्रीरङ्गराजकरुणामयदृष्टिवीक्षा
सम्प्राप्त सर्वगुणराज विराजमाने।
श्रीमच्छठप्रमथने स्थिरभावबन्धं
श्रीवत्सचिह्नगुरुमन्वहमाश्रयामि॥ 1 ॥

श्रीयामुनार्यपदपङ्कजसक्तचित्ते
श्रीमत्पराङ्कुशगुरूत्तमलब्धविद्ये।
श्रीलक्ष्मणे मुनिवरेऽर्पित सर्वभारं
श्रीवत्सचिह्नगुरुमन्वहमाश्रयामि॥ 2 ॥

आचार्यवर्यविभवस्य च शिष्यवृत्तेः
सीमेति देशिकवरैः परितुष्यमाणम्।
नित्यानवद्यकरुणाविलसत्कटाक्षं
श्रीवत्सचिह्नगुरुमन्वहमाश्रयामि॥ 3 ॥

रामानुजार्यमतसिन्धुविधो कुदृष्टि
बाह्यान्धकारपटलीहरणाब्जबन्धो।

अस्मद्गुरोर्जनक भट्टपराशरस्य
श्रीवत्सचिह्नशरणं भव मे दयालो ॥ 4 ॥

श्रीवत्सचिह्न भवतश्चरणारविन्द
सेवामृतैकरसिकान् करुणासुपूर्णान्।
भट्टार्यवर्य निगमान्तमुनीन्द्र लोक
गुर्वादि देशिकवरान् शरणं प्रपद्ये ॥ 5 ॥

श्रीरङ्गराजमहिषीकरलालनेन
सम्प्राप्तसर्वविभवस्य पराशरस्य।
कुर्यां मदन्वयगुरोः गुरुतां गतस्य
कूराधिपस्य गुणचिन्तनमन्तरङ्गैः ॥ 6 ॥

वैराग्यभक्तिजलधेः कृतिनश्च सत्य
सङ्कल्पनस्य मृदितारिगणस्य नाथ।
श्रीवत्सचिह्न पुरतस्तव गन्तुमेव
नार्होऽहमेवमधुना प्रलपामि हन्त ॥ 7 ॥

मायाविदूरमनसां मधुराकृतीनां
मात्सर्यलोभमदमानविवर्जितानाम्।
श्रीवत्सचिह्न भवतश्चरणाश्रितानां
अन्तर्गतोऽस्यहमहो विभयश्चरामि ॥ 8 ॥

कूराधिप त्रिविधतापनिदानमेतत्
संरक्ष्य हेयतरमेव कलेबरं हा।
आत्मस्वरूपमतिनिर्मलमत्युपेक्ष्य
तस्यानुरूपफलशून्य इहैव वर्ते ॥ 9 ॥

ज्ञात्वाऽप्यकृत्यकरणं विहिताप्रवृत्तिं
    क्रूरप्रमत्त इव जात्वनुतापशून्यः।
पापाकृतिस्त्वदनुबन्धिषु सज्जनेषु
    कूराधिपाहमपि हृष्टमनाश्चरामि॥ **10** ॥

कूरान्वयस्य तव दोषचयस्तवेऽहं
    सर्वात्मनाऽभिमत एव हि वत्सलस्य।
स्वामिंस्तथापि मम तत्करणे तु हन्त
    तापो भवत्यहरहःकथमुत्सहेय॥ **11** ॥

श्रीवत्सचिह्न तव भूरिदयापगायां
    स्नात्वाऽतिनिर्मलतमोऽपि मितम्पचोऽहम्।
निन्द्येषु कर्मनिचयेषु निरूढबुद्धिः
    मज्जायधस्तमसि हा तव निर्भरोऽस्मि॥ **12** ॥

श्रीवत्सचिह्न भवतश्चरणाश्रितानां
    अस्माकमप्यनुचितेषु भवेच्चिकीर्षा।
सा सर्वथा भवति दुःखकरी तवैव
    तस्मात्त्वमेव हर तादृशकर्मचिन्ताम्॥ **13** ॥

कूराधिपालमतिवेलकृतेन कर्म
    मूलेन यत्सखमवाप्तमथापि दुःखम्।
तच्छक्नुमो नु न निवारयितुं च सोढुं
    तत्सङ्गमेव विनिवर्तय ते प्रभावात्॥ **14** ॥

स्मृत्वा मदीयविपरीतगतस्तदैव
    भग्नाशयोऽप्यथ च हृष्टमनाश्चरामि।
श्रीवत्सचिह्न भवतस्त्वतिवेलशील
    वात्सल्यसौहृददयादिगुणान्विमृश्य॥ **15** ॥

कूराधिनाथ गुणसन्तति चिन्तनेन
कस्याशयस्तव न याति परं प्रमोदम्।
निस्संशयत्वमथ निर्भयतां च सम्यग्
वृत्तिप्रवृत्त्यभिरतिं परमां विरक्तिम्॥ **16**॥

श्रीरङ्गनायकभवत्प्रतिभाषणानि
श्रुत्वा प्रहृष्टमनसा यतिशेखरेण।
उक्तां सुभाषितसुधां च निशम्य नाथ
त्वद्बन्धुताऽस्ति मम चेत्यभयश्चरामि॥ **17**॥

श्रीवत्सचिह्न भवताऽप्यभिमानितोऽहं
इत्यादरेण सततं मयि रङ्गनाथः।
कुर्वन्दयां न विजहाति कृतागसं मां
रक्षत्यहो त्वयि तु कीदृगनुग्रहोऽस्य॥ **18**॥

श्रीवत्सलक्षण शरीरवशोऽपि नित्यं
नाथानुतप्त इव च प्रलपामि तेऽग्रे।
मैत्र्या शठश्च खल एष इतीह मत्वा
मामन्वहं समभिषिञ्च कृपाकटाक्षैः॥ **19**॥

आपन्नदीनजनरक्षणबन्ददीक्षा
विज्ञापनं त्विह मयोदितमुक्तिमात्रम्।
सार्थं विचार्य सहसाऽद्य तवैव पूर्त्या
कूराधिपोन्नमय मामिह सर्वथा त्वम्॥ **20**॥

॥ इति श्री कूरेश विंशतिः समाप्ता॥